Roll No. ..........................

Total No. of Pages : 4

Total No. of Questions : 12

पूर्वमध्यमा प्रथमखण्ड

**विषय कोड : 502**

संस्कृतभाषापरिचयः

द्वितीय-प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

---

1. उचितविकल्पं चित्वा लिखत – 5×1=5

(क) च वर्गस्योच्चारणस्थानमस्ति –

(*i*) कण्ठः (*ii*) तालुः

(*iii*) मूर्धा (*iv*) नासिका

(ख) दन्तः वर्णः वर्तते –

(*i*) कः (*ii*) जः

(*iii*) दः (*iv*) पः

(ग) कर्मणि विभक्तिर्भवति –

(*i*) द्वितीया (*ii*) प्रथमा

(*iii*) तृतीया (*iv*) चतुर्थी

(घ) "यथाशक्ति" पदे समासोऽस्ति –

(*i*) तत्पुरुषः (*ii*) द्वन्द्वः

(*iii*) बहुब्रीहिः (*iv*) अव्ययीभावः

(ङ) वर्तमानकाले लकारः भवति –

(i) लृट् (ii) लट्

(iii) लङ् (iv) लोट्

2. रिक्तस्थानानि पूरयत – 5×1=5

(क) अपादाने ................................ विभक्तिः भवति।

(ख) बाह्यप्रयत्नाः ................................ भवन्ति।

(ग) "गणेशः" इति पदे ................................ सन्धिः वर्तते।

(घ) "लिखतु" इति पदे ................................ लकारोऽस्ति।

(ङ) "रामाय" इति पदे ................................ विभक्तिः वर्तते।

3. युग्ममेलनं कुरुत – 5×1=5

| | |
|---|---|
| (क) रमया | अयादिः |
| (ख) भवेत् | नमः |
| (ग) पावकः | विधिलिङ् |
| (घ) चतुर्दश | तृतीया |
| (ङ) गणेशाय | माहेश्वरसूत्राणि। |

4. सत्यकथनानां समक्षे "आम" असत्यकथनानां समक्षे "न" इति लिखत – 5×1=5

(क) "पठन्" इति पदे शतृ प्रत्ययो भवति।

(ख) "कोऽपि" इति पदे पररूपसन्धिर्भवति।

(ग) "पीताम्बरः" इति पदे बहुव्रीहिः समासोऽस्ति।

(घ) अच् प्रत्याहारे नव वर्णाः भवन्ति।

(ङ) विंशति उपसर्गाः भवन्ति।



6

5. **एक**पदेन उत्तर – 5×1=5

(क) कति वचनानि सन्ति ?

(ख) लकाराः कति ?

(ग) कति विभक्तयः ?

(घ) कति उपसर्गाः भवन्ति ?

(ङ) "हस् + क्त्वा" इति मिलित्वा किं रूपं अभवत् ?

6. केचन **पञ्च** पदानां सन्धिविच्छेदं कृत्वा सन्धेः नामानि लिखत – 5×2=10

इत्यादिः, नायकः, उपैति, मनोरथः, पेष्टा, प्रत्यङ्गात्मा, रामश्शेते, वागीशः।

7. समासविग्रहं कृत्वा तेषां नामानि च लिखत (केचन **पञ्च**) – 5×2=10

अनुरूपम्, सचक्रम्, विद्यालयः, अग्निदग्धा, दशाननः, पितरौ, पीताम्बरम्, रामलक्ष्मणौ।

8. निर्देशानुसारं शब्दनिर्माणं कुरुत (केचन **पञ्च**) – 5×2=10

(*i*) वद् + शतृ

(*ii*) खाद् + क्त्वा

(*iii*) गम् + क्त

(*iv*) कृ + वतुप्

(*v*) पा + शतृ

(*vi*) पठ + क्तवतु

(*vii*) कम्प + शानच्।

9. हिन्दीभाषायां व्याख्यां कुरु – 15

सतां सज्जनानां सङ्गति सम्पर्क, संसर्गो वा सत्सङ्गतिः इति कथ्यते। वस्तुतः सत्सङ्गात् एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण जनः सज्जनः भवति। दुर्जनानां संसर्गेण जनः दुर्जनः च भवति। स्थाने एवोक्तं "संसर्गजा दोष गुणा भवन्ति" इति। अतः स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेंव सङ्गतिर्विधेया।

10. संस्कृतभाषायां लिखत (केचन **पञ्च**) – 5×3=15

(क) रमेशं घर जाता है।

(ख) सीता राम के साथ वन गई।

(ग) सरस्वती को प्रणाम।

(घ) जननी और जन्मभूमि स्वर्ग से भी प्रिय है।

(ङ) मुझको भोजन अच्छा लगता है।

(च) बालक मैदान में खेलते हैं।

(छ) श्यामा ने पुस्तक पढ़ी थी।

(ज) उसे लिखना चाहिए।

11. निर्देशानुसारं धातु रूपं लिखत (केचन **द्वौ**) – 2×5=10

| **धातु** | **लकारः** |
|---|---|
| पठ् | लट् |
| गम्लृ | लङ् |
| लभ् | लृट् |
| भू | लोट् |
| पा | विधिलिङ् |

12. राम **अथवा** रमा शब्दस्य सम्पूर्णं रूपाणि लिखत। 5



8